

# सम्प्रेषिका'१९

## वार्षिकपत्रम्(२०१८-१९)


### प्राचार्यायाः संदेशः



महतीप्रसन्नतायाः विषयोऽयं यत् अस्माकं महाविद्यालयस्य संस्कृतविभागेन प्रथमवारं **'सम्प्रेषिका'** नाम समाचारपत्रं प्रकाश्यते। अस्मिन् पत्रे विभागेन आयोजितानां गतिविधिनां प्रतियोगितानां च विवरणं दत्तम्। समाचारपत्रोऽय स्कृतभाषायामेव वर्तते। अनेन नवीनप्रयोगेण छात्राणामुत्साहवर्धनं भविष्यति, संस्कृतभाषां प्रति च तासां रुचिः वर्धयिष्यते। अहमित्थं दृढम्विश्वसिमि।

एतत्सफलप्रयासार्थमहं संस्कृतविभागम् प्रति शुभकामनाः प्रेषयामि।

शुभाशयाः।



**(डॉ. सुमन शर्मा)**

## विभागाध्यक्षाया: संदेश:



अत्यन्तहर्षस्यानुभूतिरियम् यत् लेडीश्रीराममहाविद्यालयस्य संस्कृतविभागेन **"सम्प्रेषिका"** इति नाम्न: समाचारपत्रस्य प्रकाशनम् क्रियते। संस्कृतविभागेन गतवर्षे अनेकाः शैक्षणिक-सांस्कृतिक-गतिविधयः समायोजिताः। तासामेव विवरणमस्मिन् समाचारपत्रे प्रस्तूयते।

सर्वप्रथममहमस्माकं महाविद्यालयस्य प्राचार्यायाः डॉ.सुमनशर्मामहोदयायाः हार्दिकधन्यवादाः व्याहरामि यासां आशीर्वादं विना कार्यमेतत् संभवं नासीत्। संस्कृतविभागस्य छात्राभिः कृतोऽयं नूतनप्रयासोऽतीव श्लाघनीयो: वर्तते। एतत्कृते ताभ्य: मम भूरिशः शुभाशयाः शुभकामनाश्च। अहमस्माकं विभागस्य आचार्यान् प्रत्यपि हार्दिकधन्यावादाः ज्ञापयामि।

भवदीया।



**(डॉ. वंदना एस. भान)**

## संपादिकायाः मन्तव्य:



संस्कृतं नाम अद्वितीयऽतिविशिष्टा काचन भाषा। कथनमात्रादेव यतो भाषा इति पदं भवति सार्थकं स्पष्टतरं च, इत्येतस्मात् कारणाद् भाषापरकस्य संस्कृतशब्दस्योपस्थित्या तदीय संभाषणस्वरूपमपि निर्विवादं सत् सदैव स्थितं स्यात् प्रासंगिकम्। धन्यवादा:।

**(निधि झा, सृष्टि शर्मा, खुशबू, स्वाति झा, सहना)**

## संस्कृतछात्रसंघस्य स्नेहवाचांसि



अत्यन्तहर्षस्य विषयोऽयं यत् संस्कृतविभाग: प्रथमवारं **"सम्प्रेषिका"** इति वार्षिकपत्रिकां प्रकाशयति। संस्कृतविभागस्य सम्पूर्णाचार्यमण्डलस्य सहभागिता प्रेरणा च श्लाघनीया नूनम्। वयमपि संस्कृतविभागाय अतिश्लाघनीयप्रयासाय अभिनन्दं प्रेषयाम:।

अभिनंदनानि।

**(निधि झा, ज्योति, वत्सला अग्रवाल)**



**<u>वार्षिक-शैक्षणिक-सम्मेलनम्</u>-** संस्कृतविभागेन २०१९ तमे वर्षे, मार्च् मासस्य अष्टमे तथा नवमे दिनाङ्कयो: वार्षिक-शैक्षणिक-सम्मेलनम्- **'संस्कृतिः'** आयोजितम्।

**<u>प्रथमं दिनम् : संस्कृतम्-एम.यू.एन. (माडल-यूनाईटेड-नेशन)</u>**





प्रायः संस्कृतसंसारे प्रथमेयं परिकल्पना- संस्कृतं-एम.यू.एन.। एम.यू.एन. परिचर्चायाः विषयः –**संस्कृतं, संस्कृतिः तथा विश्वम्'**। विभिन्नेभ्यः देहलीविश्वविद्यालयेभ्यः प्रतिभागिनः छात्राः समागताः। प्रत्येकोपि प्रतिस्पर्धी एकैकस्य देशस्यप्रतिनिधित्वं ऊढवान्। अमेरिका, जर्मनी, फ्रान्स, ब्रिटेन, भारतम् इत्यादयः देशाः तेभ्यः नियुक्ताः। प्रतिभागिन: वक्तव्यपरम्प्रश्नोत्तरम् अवर्तत, यत्र सर्वापि छात्रा: सोत्साहं प्रश्नं-प्रतिप्रश्नं पृष्ट्वा "वादे-वादे जायते तत्त्वबोध:" इति वाच्यार्थं पुन: निवेशितवत्य:। परिचर्चायाः परम् डा.गिरीशनाथझामहोदय:, डीन, संस्कृत एवं प्राच्याविद्याध्ययनसंस्थान:, जवाहरलालनेहरुविश्वविद्यालयः विषयमधिकृत्य व्याख्यां च अकार्षीत्। डा.गिरीशनाथझा तथा डा.अजितकुमारः निर्णायकौ अभूताम्। भारतस्य प्रतिनिधित्वं वोढौ आशिषशर्मा, मधुबाला च श्रेष्ठप्रतिनिधीति घोषितौ। छात्राः विभिन्नानां देशानाम् आचार-विचारान्, भाषा-भूषणान्, कलाकलापान्, संशोधनान् च संस्कृतेन सह विद्यमानम् अन्वयं च अदर्शयन्। छात्रकलाप्रस्तुतिः हर्षवर्धिका अवर्तत।

## कार्यशाला:




'**वास्तुशास्त्रम्'** इति विषये परिचर्चामण्डलम् आयोजितम्। मुख्यवक्तृत्वपदम् अलङ्कृतवन्तौ डा.उमाशङ्करः, प्राध्यापकः, देहलीविश्वविद्यालयः, तथा डा.प्रवेशव्यासः, प्राध्यापकः, लालबहादुरशास्त्रीविश्वविद्यालयः। छात्राभिः वास्तुशास्त्रस्य विषयानाम् अनेकानाम् परिचयः प्राप्तः। ताभ्यां विशेषतः गृहस्य परिधौ '**कुशलजीवनार्थं वास्तुशास्त्रम्'** इति तत्त्वं परिदर्शितम्। संस्कृतसम्बन्धिनः अध्ययनपद्धतेः, उद्योगावकाशस्य च नूतनः अंशः अवगतः।

## <u>संस्कृतिः- द्वितीयः दिवसः</u>



संस्कृतेः द्वितीयदिवसे संस्कृतभाषायां रुचेः प्रोत्साहनार्थं आंतरमहाविद्यालयीयाः प्रतियोगिताः समायोजिताः। **संस्कृतभाषण-श्लोकसस्वरपाठ-चित्रकर्मप्रतिस्पर्धासु** दिल्लीविश्वविद्यालयस्य महाविद्यालयानां बहवः छात्राः सोत्साहेन प्रतिभगितां स्वीकृतवन्तः। प्रतिस्पर्धानामेतासां निर्णायकाः रूपेण कमलानेहरूमहाविद्यालयस्य डॉ.सुषमाचौधरीमहोदयाः, जामियाविश्वविद्यालयस्य संस्कृतविभागात् डॉ.धनञ्जयमणित्रिपाठीमहाभागाः सत्यवतीमहाविद्यालयात् डॉ.अजयझामहोदयश्चोपस्थिताः आसन्। निर्णायकानां प्रेरकसन्देशैः सर्वेछात्राः उत्साहमनुभूतवन्तः।

## <u>संस्कृत-कार्यशाला</u>



संस्कृतविभागेन जुलै-आगस्टमासयोः दशदिनात्मिका कार्यशाला समायोजिता। कार्याशालेयं **संस्कृतसम्भाषणाधारिता**ऽसीत्। सायंकाले सार्धचतुर्वादनतः सार्धपञ्चवादनपर्यन्तं कार्यशाला प्रवर्तते स्म। निधिझा स्वातिझा चैताभ्यां कार्याशालेयं सञ्चालिता। दशमेदिवसे समापनसमारोहे दिल्लीदूरदर्शनस्य संस्कृतवार्ताप्रवाचकः श्रीमान्गवीशद्विवेदीमहोदयः प्रमुखवक्तृ रुपेण आमन्त्रिताः। संस्कृतसम्भाषणाय न केवलं संस्कृतिविषयस्य छात्राः

अपितु महाविद्यालयीयेभ्यः विविधविभागेभ्यः दर्शनशास्त्र-समाजशास्त्रांग्ल-हिन्दीविभागेभ्यश्च छात्राः सहभागितां स्वीकृत्वत्यः। कार्यशालायारस्याः अन्यतमं प्रयोजमासीत् यत् विविधविषयाणां छात्राः संस्कृतभाषां उत्कृष्टतां जानीयुः। अस्याः कार्यशालायाः माध्यमेन छात्रा ज्ञातव्यः यत् संस्कृतभाषा संस्कृतसम्भाषणञ्च कथमपि क्लिष्टम् कठिनं वा नास्ति।

## अतिथिव्याख्यान:







नवंबरमासस्य पञ्चदशदिनाङ्के **'संस्कृतसम्भाषणस्य प्रासङ्गिकता'** विषयकी वार्ता नारायणदत्तमिश्रमहोदयेन, अतिथिप्राध्यापकः, संस्कृत एवं प्राच्याविद्याध्ययनसंस्थानः, जवाहरलालनेहरुविश्वविद्यालयः, प्रस्तुता। अस्याः वार्तायाः प्रमुखाः बिंदवः आसन्- संस्कृतसम्बद्धं यत् किमपि ज्ञानविज्ञानसंसारमात्रं तत् सर्वमेव न केवलं सैद्धान्तिकस्वरूपे एव स्थातुं शक्नुयाद् अपितु सिद्धान्तापेक्षया प्रायोगिकं स्वरूपमपि यथा संस्थितं स्यात् तदर्थं संस्कृतस्य साम्प्रतिकं सार्वत्रिकं चापि सम्भाषणस्वरूपं यथापेक्षं प्रासङ्गिकमेव। भारतीयपरिप्रेक्ष्यमनुसृत्यापि संस्कृतसम्बन्धिकौशलसंवर्धनार्थं तद्गतं सम्भाषणनैपुण्यमपि स्थास्यति महत्त्वास्पदमेव। संस्कृतेन सह प्रायः वैश्विकभाषाणां परोक्षापरोक्षतया वर्तत एव सम्बन्धः। वस्तुतः सम्बन्धमिममेव समाश्रित्य विविधसंस्कृतीनां तन्निष्ठभाषिकसामीप्यस्य च यथार्थतया सम्परीक्षणक्रमेऽपि संस्कृतसम्भाषणस्वरूपस्य स्थास्यत्यतीवोपादेयता। भारतीयसन्दर्भे साकल्येन दृश्यमानं भाषागतं समैक्यं यथा पल्लवितं पुष्पितं च सत् संरक्षितं स्यात् स्थितं तदर्थं संस्कृतस्य सम्भाषणस्वरूपम् अतीवावश्यकम्, येन समैक्यतथ्यं साक्षादेव सर्वैरनुभूतमिव स्थितं स्यादस्मत्समक्षम्। विविधक्षेत्रीयसम्बद्धान् आजीविकावसरान् उपपादयितुमपि विशेषतः समर्थाऽस्ति साम्प्रतं संस्कृतभाषा तदर्थमपि संस्कृतसम्बद्धज्ञानविज्ञानान्वयेन सह तद्भाषिकस्वरूपं भाषितुमपि निपुणाः स्मो वयम्, एतस्मात् कारणादपि संस्कृतसम्भाषणस्वरूपस्य विशेषतः सिद्ध्यत्येव प्रासङ्गिकता:।

संस्कृतविभागेन बृहस्पतिवासरे 20.09.18 तमे दिनांके व्याख्यानकार्यक्रमः समायोजितः। व्याख्यानः एषः **'अभिनयः पटकथालेखनं च'** इति विषयमधिकृत्य समायोजितः। अस्मिन् कार्यक्रमे वक्तृरूपेण जामियामिलियाइस्लामियाविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षाः प्रो.गिरीशचन्द्रपन्तमहोदयाः आमंत्रिताः आसन्। पन्तमहोदयाः 'पी.पी.टी' इति माध्यमेन स्वव्याख्यानं प्रस्तुतवन्तः। तैः चतुर्विधाभिनयाः आंगिकवाचिकसात्विकाहार्याः विशदरूपेण वर्णिताः। अपि च नाट्ये विविधपात्राणां भेदाः कथानुसारेण समायोजनं अपि वर्णितम्। उत्तमनाट्यरचनार्थं पटकथा कीदृशी भवेत्, अस्मिन् विषये विविधशास्त्रेषु प्रतिपादिताः नियमाः प्रतिनियमाश्च पन्तमहोदयैः उल्लिखिताः। अस्मिन् कार्यक्रमे दिल्लीविश्वविद्यालयस्य विविधेभ्यः महाविद्यालयेभ्योऽपि बहवः छात्राः आगत्य व्याख्यानं श्रृण्वन्तः। व्याख्यानोऽयं विद्यार्थिनां ज्ञानवर्धनाय अतीवोपयोगी सिद्धमभूत्।

**संस्कृतसप्ताहस्यसमाचरणम्**




लेडीश्रीराममहाविद्यालयेसंस्कृतविभागेननैका: कार्यक्रमा: सुष्ठुरूपेण समायोजिता:।

तद्यथा:-

- **'संस्कृत-फ्लैश-मोब'**- श्रावणप्रतिपद्विलम्बिसंवत्सर: ( २७ओगस्ट्२०१८)
- **'संस्कृते विज्ञानम्'** इत्याख्या प्रदर्शिनी- श्रावणद्वितीयाविलम्बिसंवत्सर: ( २८ओगस्ट्२०१८)
- सांस्कृतिककार्यक्रमा:-**"जननीजन्मभूमिश्च स्वर्गादपि गरीयसी"** इत्याख्यंनाटकम्, नृत्यम्, गीतम्, संस्कृतचलच्चित्रप्रदर्शनम् रामकृष्णडालमियासभागारे श्रावणपञ्चम्यां (३१ओगस्ट२०१८) सुसम्पन्ना:।

## अंतरकक्षीय प्रतिस्पर्धा:








संस्कृतविषयस्य शिक्षणविद्यान्तर्गते छात्रा सुसंस्कृतपद्यानामुच्चारणे, संस्कृतभाषणे संस्कृतसाहित्यांशान् आधृत्य कलात्मिका प्रस्तुतौ च रूचिमुत्पादयितुं संस्कृतविभागेन अन्तर्कक्षियाप्रतिस्पर्धाः आयोज्यन्ते।

वर्षेऽस्मिन्नपि विभागेन चतस्त्रः अन्तर्कक्षिया प्रतिस्पर्धाः आयोजिताः। याः आसन्- **संस्कृतगद्यपाठप्रतिस्पर्धा-संस्कृतश्लोकोच्चारण-चलचित्राणामनुदितगीतानांप्रतिस्पर्धा-संस्कृतपद्याधारितचित्रकर्माचेति**। एकं संस्कृतकथांशं दण्डिनः दशकुमारचरितस्य विश्रुतचरितात् एकोंऽशञ्च आधृत्य प्रथम-द्वितीय-तृतीयवर्षीयाः छात्राः गद्यपाठं कृतवत्यः। गद्यपाठाय पञ्चमिनटमितः समयः दीयते। अस्यां प्रतिस्पर्धायां तृतीयवर्षीया स्वातिझा प्रथमपुरस्कारं अर्जितवती, द्वितीयपुरस्कारः द्वितीयवर्षीया वंशिकया विजितः। द्वितीयवर्षिया रजनी ततीयपुरस्कारं सम्भाजितवती। प्रथमवर्षियायै छात्रायै आकांक्षायै संस्कृतगद्यपाठाय सांत्वनापुरस्कारं प्रदत्तम्। प्रथमं 'सेमेस्टर' मध्यैव 'शिवस्तवं', 'नीतिशतकं' च कतिपयपद्यानि स्मृत्वा लयबद्धयुक्तकोकिलकण्ठैः छात्राः श्लोकान्प्रस्तुतवत्यः। अस्यां प्रतिस्पर्धायां प्रथमपुरस्कारं द्वितीयवर्षीया रजनी विजितवती। द्वितीयपुरस्कारं विजितं तृतीयवर्षीयया स्वातिझा इत्यनया। तृतीयपुरस्कारं समाहत्य विजितं द्वितीयवर्षीयया वंशिकया प्रथमवर्षीयया आकांक्षयाच। द्वितीयसेमेस्टरमध्ये अप्रैलमासे अन्ये द्वे प्रतिस्पर्धे सम्पन्ने। अस्मिन्वर्षे विभागेन नूतनप्रयोगः कृतः चलचित्राणां गीतानां संस्कृतेन अनुवादं कृत्वा तस्यामेव संगीतरचनायां गीतप्रस्तुतिप्रतिस्पर्धा आयोज्या। अस्यां प्रतिस्पर्धायां चलचित्राणाम् चित्रस्य उत्तमगीतान् स्वीकृत्य तेषां संस्कृतरूपांतरेण सह प्रस्तुतिः कृता छात्राभिः। अस्यां प्रतिस्पर्धायां प्रथमपुरस्कारः द्वितीयवर्षिया रजन्याऽवाप्तः। द्वितीयपुरस्कारं प्रदत्तम्द्वितीयवर्षियायै वंशिकायै। प्रथमवर्षीया लतेशः तृतीयपुरस्कारं विजितवती। संस्कृतकाव्येभ्यः रमणीयपद्यान्स्वीकृत्य तदाधारितचित्रकर्मणं विधातुं लेखनीमार्जनयोः साहाय्येन छात्राभिः चित्राङ्कणम्विहितम्। अस्याः स्पर्धायाः माध्यमेन छात्राः स्वकीया रचनाक्षमतां प्रस्तुवन्ति। तृतीयवर्षीयाछात्रा पुष्पा प्रथमं स्थानं प्राप्तवती। प्रथमवर्षीयया अनीतया द्वितीयपुरस्कारं विहितम्। तृतीयवर्षीया सन्ध्या च तृतीयपुरस्कारं विजितवती।

## पर्यावरणसप्ताह:



फेब्रुवरीमासे प्रदूषणस्य नियंत्रणार्थं प्रकृतिं प्रति जागरणस्य वर्धनार्थञ्च दिल्लीविश्वविद्यालयस्य सर्वमहाविद्यालयेषु पर्यावरणसप्ताहः आयोज्यते। लेडीश्रीराममहाविद्यालयेनपि अस्मिन्न वर्षे पर्यावरणसप्ताहः अनुष्ठितः। संस्कृतविभागेन अनुष्ठानेऽस्मिन्न सक्रियरूपेण प्रतिभागिता गृहीता। विभागेन महाविद्यालयीये परिसरो एकं वृक्षं चितम्। छात्राभिः सोत्साहेन स्वहस्तेन कृत्ताकृतिनां निर्माणम् कृत्वा तद्वृक्षं सज्जितम्। वृक्षस्य बीजविषयः आसीत्- **“पञ्चतत्त्वसमवेतापादपाः”** इति।



## छात्रानाम् शैक्षणिकयात्रा









**अभिलेखशास्त्रमधिकृत्य** स्नातकछात्राणाम् (“संस्कृतआनर्स” इति तथा “जी.ई.” इति) कृते पाठ्यक्रमे पाठ्यविषया: समाहितम् विद्यते। अभिलेखशास्त्रस्य प्रायोगिकज्ञानवर्धनाय संस्कृतविभागपक्षत: एकदिवसीया एकाशैक्षणिकयात्रा फेब्रुवरीमासे षोडशदिनाङ्के आयोजिता। सर्वप्रथमं यात्रैषा महाविद्यालयादारभ्य कुतुबमीनारं प्रति प्रस्थानं कृता। तत्र लौहस्तम्भोत्कीर्णा: चंद्रस्य लेखोऽस्ति। लेखोऽयं षट्सु पंक्तिषु पूर्तिमगात्। अस्य लेखस्य भाषा संस्कृतं लिपि च ब्राह्मी अस्ति। अस्य लेखस्य छात्राभि: स्वचक्षुभि: साक्षात्कृतम्। तदनन्तरं सर्वा: छात्रा: डा.अजीतकुमार-डा.कामिनीकुमारीमहोदयाभ्यां सह राष्ट्रीयसंग्रहालयं प्रति गतवत्य:। संग्रहालयस्य द्वारे बहव: प्रतिमानरूपा: लेखा: उत्कीर्णा:। तै: लेखै: छात्राणाम् ज्ञानं वर्धितम्। अस्मिन्नैव क्रमे राष्ट्रीयसंग्रहालये प्रसंगेन प्राप्तानां **‘संस्कृतम् एवं विश्वसाहित्यम्’** इति पाठ्यविषयसम्बद्धानाम् अनेकानां चित्रशैलीनामोपरि डा.कामिनीमहोदयया चर्चा कृता। मध्याहनानंतरं दिल्लीस्तंभे ‘टोपरानामकं ग्रामादानीतम्’ विग्रहराजस्याभिलेखोऽपि छात्राभि: पठित:। एषा शैक्षिकयात्रा छात्राणाम् जीवने अतीवमहत्त्वपूर्णास्ति।